# विविधप्रश्नावलिः - 3

**1. एकपदेन उत्तरं लिखत–**

(क) अनागतविधाता कुत्र अगच्छत्?
(ख) धीवराः कदा जलाशयम् अगच्छन्?
(ग) कः योगस्य प्रवर्तकः?
(घ) अगस्त्यः किं रचितवान्?
(ङ) कति जनाः नित्यदुःखिताः?
(च) शन्नोवरुणः इति ध्येयवाक्यं कस्याः सेनायाः अस्ति?
(छ) राज्ञी दुर्गावती कस्मिन् क्षेत्रे जाता?
(ज) विपरीतबुद्धिः कदा भवति?

**2. एकवाक्येन उत्तरं लिखत–**

(क) प्रभाते धीवराः किम् अकुर्वन्?
(ख) मत्स्यानां नामानि कानि?
(ग) स्वस्थे शरीरे किं सुकरं भवति?
(घ) बालचराणां का प्रथमा प्रतिज्ञा?
(ङ) कस्य धनं दानाय भवति?
(च) प्रकाशनिस्सारणेन के भोजनं कुर्वन्ति?
(छ) दलपतशाहः कस्य राज्यस्य शासकः आसीत्?
(ज) कीदृशं वचः दुर्लभं भवति?

**3. अपेक्षितं परिवर्तनं कुरुत–**

(क) बालचराः (एकवचनम्)
(ख) दलपतशाहस्य (तृतीया विभक्तिः)
(ग) प्राणायामस्य (सप्तमी विभक्तिः)
(घ) आगमनाय (प्रथमा विभक्तिः)
(ङ) साधौ (बहुवचनम्)
(च) रसायनम् (बहुवचनम्)

**4. उचितविकल्पेन वाक्यानि पूरयत–**

(क) परोपकारः ................ अस्ति। (पुण्याय/पापाय/धर्माय)
(ख) दुर्गावती यशःशरीरेण अद्यापि ..............। (जीवन्ति/अजीवत्/जीवति)
(ग) पतञ्जलिः आयुर्वेदं ............... अरचयत्। (शरीराय/मनसे/वाण्यै)

(घ) महर्षिः कणादः ............... जनकः। (परमाणुवादस्य/योगस्य/शल्यक्रियायाः)

(ङ) स्थलसेना .................... देशरक्षणं करोति।(आकाशमार्गात्/स्थलात्/जलमार्गात्)

(च) विनाशकाले .....................। (अनुकूलबुद्धिः/विपरीतबुद्धिः/सद्बुद्धिः)

**5. अधोलिखितवाक्येषु रेखाङ्कितशब्दानां कृते प्रश्नानां निमार्णं कुरुत–**

(क) मृतं प्रत्युत्पन्नमतिं धीवराः जालात् बहिः अकुर्वन्।

(ख) धीवराः मत्स्यान् जाले बद्ध्वा नेष्यन्ति।

(ग) रेखागणितं शुल्बसूत्रे अस्ति।

(घ) पृथ्वी सूर्यं परिक्रामति।

(ङ) लोककल्याणं दुर्गावत्याः आदर्शः आसीत्।

(च) सेनायाः त्रयः प्रकाराः।

(छ) उद्यमेन कार्याणि सिद्ध्यन्ति।

**6. यथायोग्यं योजयत–**

| | (अ) | (ब) |
|---|---|---|
| (क) | संसर्गजाः | परिक्रमां करोति |
| (ख) | वायुसेना | रानीदुर्गावतीविश्वविद्यालयः |
| (ग) | शरीरमाद्यं | तमो हन्ति |
| (घ) | एकश्चन्द्रः | खलु धर्मसाधनम् |
| (ङ) | पृथ्वीसूर्यस्य | नभः स्पृशं दीप्तम् |
| (च) | जबलपुरनगरे | दोषगुणाः |

**7. शुद्धवाक्यानां समक्षं 'आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत–**

(क) संसर्गजाः दोषगुणाः न भवन्ति। ☐

(ख) दुर्गावती मालवक्षेत्रे राज्यम् अकरोत्। ☐

(ग) पतञ्जलिः धनुर्वेदम् अरचयत्। ☐

(घ) बालचराः देशसेवां कुर्वन्ति। ☐

(ङ) साधोः धनं दानाय भवति। ☐

(च) बोधायनः पाइथागोरसतः पूर्वम् अभवत्। ☐

**8. समानार्थकशब्दानां मेलनं कुरुत—**

| | (अ) | (ब) |
|---|---|---|
| (क) | ऋषिः | चिकित्सकः |
| (ख) | पीडा | निवारणम् |
| (ग) | वैद्यः | अन्धकारः |
| (घ) | उन्मूलनम् | कठिनम् |
| (ङ) | तमः | दुःखम् |
| (च) | दुर्लभम् | मुनिः |

**9. विपरीतार्थकशब्दानां मेलनं कुरुत—**

| | (अ) | | (ब) |
|---|---|---|---|
| (क) | अनुकूलम् | × | अस्तः |
| (ख) | स्वदेशः | × | परस्य |
| (ग) | कष्टकारकम् | × | उद्यमः |
| (घ) | आलस्यम् | × | सुखकारकम् |
| (ङ) | स्वस्य | × | विदेशः |
| (च) | उदयः | × | प्रतिकूलम् |

**10. कोष्ठकात् उचितं पदं चित्वा रिक्तस्थानं पूरयत—**

(क्रीत्वा, नीत्वा, क्रेतुं, आगत्य, गतवान्, दातुं, जलाशये, प्रविश्य)

(क) मत्स्याः ............. निवसन्ति स्म।

(ख) मोहनः भोजनं .................. विद्यालयं ...................।

(ग) सः पुस्तकं ........ गृहकार्यं कृतवान्।

(घ) सः लेखनीं ............... आपणं गतवान्।

(ङ) ततः गृहं ................. पत्रं लिखितवान्।

(च) सः आपणतः भगिन्यै ................ उपहारम् आनीतवान्।

(छ) रात्रौ शयनकक्षं .............. सुप्तवान्।

**11. उचितविकल्पेन वाक्यानि पूरयत–**

(क) विद्या ...................... भवति। (ज्ञानस्य/ज्ञानाय)

(ख) औषधिः ............. उन्मूलयति। (रोगान्/रोगाणाम्)

(ग) अहं सप्तम ............. पठामि। (कक्षायाः/कक्षायाम्)

(घ) आर्यभटः............. गतिं ज्ञातवान् (प्रकाशाय/प्रकाशस्य)

(ङ) दुर्गावती ..................... राज्यम् अकरोत्। (चातुर्येण/चातुर्यम्)

(च) वायुसेना .............. राष्ट्रं रक्षति। (वायुमार्गे/वायुमार्गात्)

**12. उचितक्रियापदेन वाक्यं पूरयत–**

(क) आगामिमासे अहं जबलपुरं .................। (अगच्छम्/गमिष्यामि)

(ख) ह्यः भोजने मिष्टान्नं ....................। (अस्ति/आसीत्)

(ग) त्वं योगकक्षां .................। (प्रविशति/प्रविश)

(घ) वयं सर्वे देशसेवां ..................। (कुर्मः/कुर्वन्ति)

(ङ) मयूराः वने ....................। (नृत्यति/नृत्यन्ति)

(च) शरीरे द्वे नेत्रे ...............। (भवन्ति/भवतः)

**13. अन्वयपूर्तिं कुरुत–**

क) ............. गुणीपुत्रः वरं ............. शतानि अपि ............. च। एकः ............. तमः ............. तारागणाः ............. च .............।

ख) यथा यथा ............. ............. मनः कल्याणे .............। तथा ............. अस्य सर्वार्थाः ............. अत्र ............. न।